॥ चतुःषष्ठियोगिनीपूजा ।

पत्र. 14 . सं०

1392

11"x5.50"

वलनैऋतपोर्मध्ये गणपतिं तु प्रपूजयेत् वल्लवरुणपोर्मध्ये आपश्चैव प्रपूजयेत् वल्लवायुदपोर्मध्ये मरुत लमवेकरु २

= चतुष्षष्टि योगिनी पूजा =

देवीं प्रपूजयेत् १३ वल्लपाम्यदपोर्मध्ये मरुद्गणान्प्रपूजयेत् वल्लनैऋत्यपोर्मध्ये वसुविष्णोतु प्रपू
जयेत् वल्लवरुणपोर्मध्ये अपस्थाने विधीयते वल्लगः पादमूले तु मेखलानीं तत्र प्रपूजयेत् १४
कावेरीं नर्मदां चैव यमुना च सरस्वती गंगा कृष्णा तथा गोदाः पूज्याः मध्ये सप्तसागराः १५ क्षीरक्षी
रमधुसर्पिः नीरेक्षु दधिसागराः वल्लपञ्चानामित्याद्यैर्मंत्रैस्तैस्तैस्तु देवताः १६ गंधपुष्पादिभिः
पूज्याः दद्याद्दीपं धूपं सर्वशः सर्वत्र भद्रं यस्मात्सात्सर्वतोभद्रमीरितं १७ इति सर्वतोभद्रमंडलदे
न वतानां स्थापपूजनप्रकारः अथ सर्वतोभद्रमंडलस्थापितदेवानां पूजनं अद्येत्यादि अमुकगो
त्रः अमुकशर्मा कृतस्य शतचंडीप्रयोगस्य तदंगभूततरुवनकर्मांगभूते पापयथासंपादितसामग्र्या
सर्वतोभद्रमंडले ऽऽवाहनस्थापनपूजनमहं करिष्ये गणानांत्वेति मंत्रेण आग्नेय्यां गणपतिं
न्यसेत् गणानांत्वेति मंत्रस्य प्रजापतिऋषिः अनुष्टुप्छंदः गणपतिर्देवता गणपतिस्थापने
विनियोगः गणानांत्वा गणपतिं हवामहे प्रियाणांत्वा प्रियपतिं हवामहे निधीनांत्वा
निधिपतिं हवामहे वसोमम आहमजानि गर्भधमात्वमजासि गर्भधम् ओं अम्बेतेति मं
त्रेण ईशान्यां अंबिकां न्यसेत् ओं अम्बेति मंत्रस्य नारायण ऋषिः त्रिष्टुप्छंदः दुर्गा देवता

२ दुर्गास्थापने विनियोगः श्री च ते लक्ष्मीः मध्यस्थाने स्थितो देवः आब्रह्मन्निति पूजयेत् आ
ब्रह्मन्निति मंत्रस्य प्रजापति ऋषिः यजुः छंदः प्रजापतिर्देवता ब्रह्मस्थापने विनियोगः आब्रह्म
णो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढा
नड्वानाशुः सप्तिः पुरंध्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे
निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यंतां योगक्षेमो नः कल्पतां ३ सोमं चैवोत्तरे भा इतिवाप्यां ५
गे वयं सोमेति पूजयेत् वयं सोमेति मंत्रस्य बन्धु ऋषिः गायत्री छंदः सोमो देवता सोमस्था शङ्खलायां ६
पने वि० वयं सोम व्रते तव मनस्तनूषु बिभ्रतः प्रजावंतः सचेमहि ईशान्यां दिशि ईशानं
तमीशानेति पूजयेत् तमीशानमिति मंत्रस्य गोतम ऋषिः त्रिष्टुप् छंदः ईशो देवता ईशस्था
पने वि० तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयं पूषा नो यथा वेदसा
मसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ५ पूर्वस्यां दिशि देवेंद्रं त्रातारमिति पूजयेत् त्रातारमिं वाप्यां ३
द्रमिति मंत्रस्य गर्ग ऋषिः त्रिष्टुप् छंदः इंद्रो देवता इंद्रस्थापने वि० त्रातारमिंद्रमवितारमिंद्रं
हवे हवे सुहवं शूरमिंद्रं ह्वयामि शक्रं पुरुहूतमिंद्रं स्वस्ति नो मघवा धात्विंद्रः ६ २

अग्निदेवता १

इति शरखलायां १ आग्नेय्यां अग्निं १ इति याम्यां २ याम्यां ३

पूर्वदक्षिणयोर्मध्ये अग्निं त्वन्नो इति पूजयेत् त्वन्नो अग्न इति मंत्रस्य हिरण्यस्तूप ऋषिः त्रिष्टुप् छंदः अ
ग्निस्थापने वि० त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शो
शुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ७ याम्यां सुगन्नु पंथेति धर्मराजं प्रपूजयेत् सुगन्नु पंथे
ति प्रजापति ऋषिः त्रिष्टुप् छंदः यमो देवता यमस्थापने वि० सुगन्नु पंथां प्रदिशन्न एहि ज्योति
ष्मध्येह्यजरन्न आयुः अपैतु मृत्युरमृतन्न आगाद्वैवस्वतो नो अभयं कृणोतु ८ असुन्वंते
इति शरखलायां ति मंत्रेण नैर्ऋतिं निर्ऋतिं न्यसेत् असुन्वंतमिति मंत्रस्य विधृतस्त्वान् ऋषिः त्रिष्टुप् छंदः निर्ऋ
तिर्देवता निर्ऋतिस्थापने वि० असुन्वंतमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य अन्यमस्म
दिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ९ प्रतीच्यां वरुणं देवं तत्त्वायामीति पूजयेत् तत्त्वायामीति मं वायव्यां निति
त्रस्य शुनःशेप ऋषिः त्रिष्टुप् छंदः वरुणो देवता वरुणस्थापने वि० तत्त्वायामि ब्रह्मणा वंदमानस्तदा
शास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः १० आ नो नियुद्भिर्मं ५
त्रेण वायव्यां वायुमर्चयेत् आ नो नियुद्भिर्मंत्रस्य प्रजापति ऋषिः त्रिष्टुप् छंदः वायुर्देवता वायुस्था
पने वि० आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिः उपयाहि यज्ञं वायो अस्मिन्स

इति शरखलायां २

३ वुनेमाहपत्स्वपूर्णपात्रस्वस्तिभिःसदानः ११ वायुसोमरुद्रयोर्मध्ये वसवोष्टौतुपूजयेत् ध्रुवोध्वरश्च
सोमश्च आपश्चैवानिलोनलः प्रत्यूषश्च भा॰सश्च वसवोष्टौप्रकीर्त्तितः वसोःपवित्रमन्त्रेणवस
वोष्टौप्रपूजयेत् वसोःपवित्रमितिमन्त्रस्यगौतमऋषिःजगतीछंदःवसवोष्टौदेवता वसवस्थाप
नेवि० वसोःपवित्रमसिशतधारंवसोःपवित्रमसिसहस्रधारंदेवस्त्वासवितापुनातुवसोःपवि इति भद्रे ५
म त्रेणशतधारेणसुप्वाकामधुक्षः सोईशानयोर्मध्येरुद्रानेकादशार्चयेत् अजैकपादहिर्बुध्न्यो
विरूपाक्षोथरैवतः हरश्चबहुरूपश्च त्र्यम्बकश्चसुरेश्वरः सावित्रश्चजयंतश्चपिनाकीरुद्रएव
च नमस्तेरुद्रमंत्रेणरुद्रांश्चैवप्रपूजयेत् नमस्तेइतिमंत्रस्यपरमेष्ठीऋषिःगायत्रीछंदःरु
न द्रोदेवतारुद्रस्थापनेवि० नमस्तेरुद्रमन्यवउतोइषवेनमःबाहुभ्यामुततेनमः १४ ईशाने इति भद्रे ८
इंद्रयोर्मध्ये आदित्यान्द्वादशांस्तथा धातामित्रोर्यमारुद्रोवरुणःसूर्यएवच भगोविवस्वान्
पूषाचसविताचदशमस्तथा एकादशस्तथात्वष्टाविष्णुःद्वादशएवचे आदितिर्द्यौरितिमंत्रेण
आदित्यान्द्वादशान्लिखेत् आदितिर्द्यौरितिमंत्रस्यप्रजापतिऋषिःत्रिष्टुप्छंदःसूर्योदेवता
सूर्यस्थापनेवि० आदितिर्द्यौरादितिरंतरिक्षमदितिर्मातासपितासपुत्रः विश्वेदेवाआदितिःपं ३

इति मद्दे १

यजना अदितिजातमदितिर्जनित्वं १५ ईदृ अग्न्युपयोर्मध्ये अश्विनातेजसाश्विनो अश्विना
तेजसेति मंत्रस्य परमेष्ठी ऋषिः अनुष्टुप्छंदः अश्विनौ देवते अश्विन्योः स्थापने वि[नि]योगः। अश्वि
नातेजसा चक्षुः प्राणेन सरस्वती वीर्यं वाचेंद्रो बलेनेंद्राय दधुरिंद्रियं १६ अग्निपयमपोर्मध्ये इति मद्दे २
विश्वेदेवाः लपेत्क्रतुदक्षौ सत्यवसू कामो च धुवलौ चनौ पुरूरवमाद्रवसौ विश्वेदेवा इमेद
स अग्निष्वात्ताः सोमपाः अवर्हिषदः तुकालुकाः एकः शृंगो धकः अतिद्वितीयः सोमपास्तथा
विश्वेदेवा आपंतु नश्च आभ्यांतु समपूजयेत् विश्वेदेवास आगतेति मंत्रस्य परमेष्ठी ऋषिः गा
यत्री छंदः विश्वेदेवा देवता विश्वेदेवस्थापने वि० विश्वेदेवास आगता शृणुता मइमं हवं ए
वं वर्हिर्निषीदत १७ आयंतु न इति मंत्रस्य विवस्वान् ऋषिः बृहती छंदः पितरो देवता पितर
स्थापने वि० आयंतु नः पितरः सोम्यासो अग्निष्वात्ताः पथिभिर्देवजानैः अस्मिन्यज्ञे स्वधया
मदंतो धिब्रुवंतु ते वंत्वस्मान् १८ यमने ऋसपोर्मध्ये ऋषीन्सप्त प्रपूजयेत् गोतमोऽत्रिर्भर
द्वाजो विश्वामित्रोऽथ कश्यपः यमदग्निर्वशिष्ठश्च सप्तैत ऋषयः स्मृताः सप्तऋषय इति मंत्र
स्य गोतम ऋषिः जगती छंदः सप्तर्षयो देवता सप्तर्षिस्थापने वि० सप्तऋषयः प्रतिहिताः श

इति मद्दे ३

इतिभद्रे २

४ रीरे सप्तरक्षांसि सरमधमारं सप्ताप: स्वपतोलोकमीयुस्तत्र जा ग्रतो अस्वप्नजौ सत्रसदौ च दे
वौ २० नैर्ऋत [illegible] वरुणयोर्मध्ये नागभूतानि पूजयेत् अनंत: वासुकि: शेष: कर्कोटस्तक्षकस्त
था पद्म कुष्ठ महापद्म: शंखकंबल एव च पि शाचोग्रघ्नक: सिद्धो भूतो मीदेव यो नय: भूताप
त्वायुनमोस्तु सर्पेभ्या इति मंत्रत: भूतापत्वा इति मंत्रस्य पराशर ऋषि: विराट् छंद: नारायणो देव
ता भूतस्थापने वि० भूतापत्वा नारायणे स्वरभि विष्ये भुवन ह छ्रेहताहुर्मा: पृथिव्या मुवंतरिक्षम
न्ये मि पृथिव्यास्त्वा नाभो सादयाम्यदित्या उपस्थे अग्ने हव्यं रक्ष २१ नमोस्तु सर्पेभ्य इति मं
त्रस्य प्रजापतिऋषि: रनुष्टुप्छंद: सर्पोदेवता सर्पस्थापने वि० नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु इति भद्रे .
ये ऽन्तरिक्षे ये दिवि तेभ्य: सर्पेभ्यो नम: २२ वायुवरुणयोर्मध्ये गंधर्वाप्सरसस्तथा विश्वावसुश्च ५
गंधर्वो हाहाहूहूस्तथैव च घृताची मेनका रंभा उर्वसी च तिलोत्तमा सुकेशी मंजुघोषाद्या: कथ्यं
री ते ऽप्सरसो बुधै: अपांपुहरिकेश गंधर्वस्येति मंत्रत: गंधर्वाप्सरसौ ज्यो सर्वकामार्थ सिद्धये
अपांपुरो हरिकेशेति मंत्रस्य परमेष्ठी ऋषि: ककुप्छंद: अप्सरसो देवता अप्सरसस्थापने वि०
अपांपुरो हरिकेश: सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानी ग्रामण्यौ पुंजिकस्थल ४

त्वा चक्रे गुरुः स्थलाद्वास्सरसोदंदशंणवः पशवो हेतिः पौरुषेयो वधः प्रहेतिस्तेभ्यो नमो अस्तु ते नो वन्तु ते नो
मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जंभे दध्मः २२ गंधर्वस्त्वेति मंत्रस्य गोतम ऋषिः द्विपद
विराट् छंदः गंधर्वो देवता गंधर्वस्थापने वि० गंधर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यु
जमानस्य परिधिरस्यग्निरिड ईडितः इंद्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधि
रस्यग्निरिड ईडितः मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै यजमानस्य परि
रस्यग्नि धिरिड ईडितः २४ वरुणस्योत्तरे श्रीश्चते ति दुर्गां देवीं प्रपूजयेत् श्रीश्चतेति मंत्रस्य नारायण ऋषिः
त्रिष्टुप्छंदः दुर्गास्थापने वि० श्रीश्चते २५ वरुणोत्तरे पार्श्वे यव रुद्रेति शंकरं स्कंदं नंदीश्वरं शू इति वात्स्यां ६
लं महादेवं च पूजयेत् यव रुद्रेति मंत्रस्य परमेष्ठी ऋषिः ककुप्छंदः रुद्रो देवता रुद्रस्थापने वि०
यव रुद्रमदीमह्यं देवं त्र्यंबकं यथानो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् २६ दु प
ले ईशानपार्श्वे च अग्नियाविष्णुस्तथैव च सहस्रस्येति मंत्रेण विस्तारराटेति मंत्रतः लक्ष्मीः पूज्या
तदाभक्त्या विष्णुपूज्यस्तथैव च सहस्रस्येति मंत्रस्य नारायण ऋषिः उष्णिक् छंदः लक्ष्मीर्देवता ल
क्ष्मीस्थापने वि० सहस्रस्येति मद्भुतं प्रियमिंद्रस्य काम्यं सनिं मेधामयासिषं स्वाहा २७ वि
इति वात्स्यां ३

मि २ . . . . शी २

इति वरसां २

५ विष्णो रराटमिति मंत्रस्य प्रजापतिऋषिः अनुष्टुप्छंदः विष्णुर्देवता विष्णुस्थापने वि० विष्णो रराटमसि
विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा २८ [illegible] मरु
तां सप्तको गणः शुक्रज्योतिश्चेत्यनुवाकेन षड्भिः परिपूजयेत् शुक्रज्योतिश्चेत्यनुवाकस्य
स्यं मंत्रस्य षट्कस्य पराशर ऋषिः विराट् छंदः मरुतो देवता मरुत्स्थापने वि० शुक्रज्योतिश्च
चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च शुक्रश्च ऋतपाश्चात्यंहाः २९ ईदृङ् चान्यादृङ् च सदृङ्
प्रतिसदृङ् मितश्च संमितश्च सभराः ३० ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च
विधारयः ३१ ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च अन्तिमित्रश्च दूरे अमित्रश्च गणः ३२
ईदृक्षास एतादृक्षास ऊषुणः सदृक्षासः प्रतिसदृक्षास एतन मितासश्च संमितासो नो अद्य सभरसो
मरुतो यज्ञे अस्मिन् ३३ स्वतवांश्च प्रघासी च सांतपनश्च गृहमेधी च क्रीडी च शाकी चोज्जेषी ३४
स्वैर्दक्षैरपितया मरुतां [illegible] पूजनं स्मृतं स्वैर्दक्षैरिति मंत्रस्य पराशर ऋषिः विराट् छंदः मरुतो
देवता मरुत्स्थापने वि० स्वैर्दक्षैर्दक्षपितेह सीद देवानां सुम्ने बृहते रणाय पितेवैधि सू
नव आ वृषस्वा वेशांतन्या संविशस्वादिवनाध्वपूर्तादयजामिहत्वा [illegible] ५

इतिवल्मां १

इतिवल्मां २

पयोमि ध्येऽग्नेवाजजिद्धिति स्वधां अग्नेवाजजिद्धिति मंत्रस्य मधुच्छंद ऋषिः बृहती छंदः वैश्वा
नरो देवता स्वधास्थापने वि० अग्नेवाजजिद्वाजं त्वा सरिष्यंतं वाजजितं सं मार्ज्मि नमो देवेभ्यः
स्वधा पितृभ्यः सुयमे मे भूयास्तं ॐ बलप्रमथनाय नमः ध्ये अमृतं रोगेतु पूजयेत् अन्नमवापोर्द्धमासोना
ककुभं थंमिति मंत्रतः अन्नमवापोर्द्धमासेति मंत्रस्य संकसुको नाम ऋषिः जगती छंदः अमृतं देवता अमृ
तस्थापने वि नियोगः अन्नमवापोर्द्धमासानामथ श्योमपूरः सुपर्णलत्ते गंधर्वाणामपामुद्रामासांक
स्यपोरोहितश्रुद्र्यणान्वीगोलतिकालेऽमरसां मस्यु वेमिते ॐ ककुभंथं रूपमिति मंत्रस्य प्रजा
पति ऋषिः यजुः छंदः रोगो देवता रोगस्थापने वि० ककुभंथं रूपं वृषभस्य रोचते बृहच्छुक्रः
शुक्रस्य पुरोगाः सोमः सोमस्य पुरोगाः यत्ते सोमाभ्यं नाम जागृवि तस्मै त्वा गृह्णामि तस्मै ते इतिवल्मां ४
सोमः सोमाय स्वाहा ॐ बलनेत्राय नमः ध्येयसु विधौतु पूजयेत् गणानांत्वेति मंत्रेण पूज्या
येतौ प्रबंधक गणानांत्वेति मंत्रस्य प्रजापतिऋषिः अनुष्टुप्छंदः गणपतिर्देवता गणपतिस्था
पने वि० गणानांत्वा ॐ धूलवरुणाय नमः ध्ये आपस्थानं विधीयते अपो अद्येति मंत्रेण अ
पां चैव प्रपूजनं अपो अद्येति मंत्रस्य हिरण्यस्तूपांगिरस ऋषिः त्रिष्टुप्छंदः आपो देवता अपां

इतिवल्मां २

इतिवत्स्यां २

६ स्थापनेवि० अपोअद्यान्वचारिषंरसेनसमसृक्ष्महि पयस्वानग्नआगमंतंमासंसृजव
र्चसाप्रजयाचधनेनच ६९ अलंवाडइत्योमध्येमरुतांसप्तकोगणाः समीरमारुतमरुतजगत्प्राणाः
समीरणाः इमेचसप्तमरुतोमातरिश्वातथानिलः बृहदिंद्रायमंत्रेणपूज्यास्त्वनाहिवायवः बृह
दिंद्रायेतिमंत्रस्यपरमेष्ठीऋषिःबृहतीछंदःमरुतोदेवतामरुतस्थापनेवि० बृहदिंद्रायगाय
तमरुतोवृत्रहंतमं येनज्योतिरजनयन्नृतावृधोदेवंदेवायजागृवि ६२ वृलक्षणःपादमूलेतु
मेदिनींतत्रपूजयेत् महीद्यौरितिमंत्रेणपृथ्वीपूज्याःप्रजल्पतः महीद्यौरितिमंत्रस्यमेधाति
थिऋषिर्गायत्रीछंदःपृथिवीदेवतापृथिवीस्थापनेवि० महीद्यौःपृथिवीचनइमंयज्ञंमिमि
५ क्षतां पिपृतान्नोभरीमभिः ६३ नदीभ्यइतिमंत्रेणनदीपूज्यास्ततः गंगाचयमुनाचैवसर
यूयसरस्वती कोशीवेत्रवतीगोदातापीरेवापयोष्णिका कृष्णाभीमारथीतुंगाभद्रासुदुनदी
स्तथा नदीभ्यइतिमंत्रेणनदीपूज्यास्ततः नदीभ्यइतिमंत्रस्यपरमेष्ठीऋषिःयजुः
छंदः नद्योदेवतानदीस्थापनेवि० नदीभ्यःपौंजिष्ठमृक्षीकाभ्योनैषादंपुरुषव्याघ्रायदुर्म
दंगंधर्वाप्सरोभ्योव्रात्यंप्रयुग्भ्यउन्मत्तंसर्पदेवजनेभ्योप्रतिपदमयेभ्यःकितवमीर्यता ६
बलोत्तरकर्णिकायांगंगादिनद्यः ५

याः किनवं पिशाचेभ्यो विस्त्रकारीं यातुधानेभ्यः कुंदकीकारीं ४४ लवणेक्षुसुरासर्पिर्दधिक्षीर
सुजीवनः समुद्रासि नभस्वान् मंत्रेणानेन चोत्तरे समुद्रासि इति मंत्रस्य प्रजापति ऋषिः यजुः
छंदः प्रजापतिर्देवता समुद्रस्थापने वि० समुद्रासि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा
वाहि स्वाहा मारुतोसि मरुतां गणः शंभूर्मयोभूरभि मा वाहि स्वाहा अवस्यूरसि दुवस्वान् शंभूर्मयो
भूरभि मा वाहि स्वाहा ४५ आदित्यश्चेंदुमा भौमो बुधः जीवसितार्कजाः सर्वे ग्रहास्तु संपूज्या राहु
केतुक्रमेण च अग्निं दूतमित्याद्यैः मंत्रैस्तान् परिपूजयेत् अग्निं दूतमिति मंत्रस्य मेधातिथि
ऋषिः गायत्री छंदः सविता देवता सवितास्थापने वि० अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रु
वे देवां २ आसादयादिह ४६ आश्वाग्निरिति मंत्रेण चंद्रं च परिपूजयेत् अश्वग्निरिति मंत्र
स्य वामदेव ऋषिः गायत्री छंदः सोमो देवता सोमस्थापने वि० अश्वग्ने मधिष्ठ्य सोम धीरन्
प्से गर्भे संजायते उ नः ४७ स्योना पृथिवीति मंत्रेण भौमं च परिपूजयेत् स्योना पृथिवी
ति मंत्रस्य दध्यंगाथर्वण ऋषिः गायत्री छंदः अंगारको देवता अंगारकस्थापने विनियोगः स्यो
ना पृथिवी नो भवानृक्षरा निवेशनी यच्छा नः शर्म सप्रथाः ४८ इदं विष्णुरिति मंत्रेण बुधं

७ चपरिपूजयेत् इदंविष्णुरितिमंत्रस्यमेधातिथिऋषिः गायत्रीछंदः बुधोदेवता बुधस्था
पनेवि० इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं समूढमस्यपांशुरे स्वाहा ४९ महाँइंद्र इ
तिमंत्रेणगुरुंचपरिपूजयेत् महांइंद्रइतिमंत्रस्यहिरण्यगर्भऋषिः गायत्रीछंदः बृह
स्पतिर्देवता बृहस्पतिस्थापनेविनियोगः महांइंद्रोवज्रहस्तः षोडशीशर्मयच्छतु हंतु
पाप्मानंयोस्मान्द्वेष्टि उपयामगृहीतोसिमहेंद्रायत्वैषतेयोनिर्महेंद्रायत्वा ५० शुक्रज्यो
तिश्चमंत्रेणभार्गवंपरिपूजयेत् शुक्रज्योतिश्चेतिमंत्रस्यवामदेवऋषिः उष्णिक्छं
दः शुक्रोदेवता शुक्रस्थापनेवि० शुक्रज्योतिश्चसत्यज्योतिश्चज्योतिष्मांश्च शुक्रश्च
ऋतपाश्चात्यंहाः ५१ प्रजापतेतिमंत्रेणशनिंचपरिपूजयेत् प्रजापतेतिमंत्रस्यहिर
ण्यगर्भऋषिः त्रिष्टुप्छंदः शनैश्चरोदेवता शनैश्चरस्थापनेवि० प्रजापतेनत्वदेता
न्यन्योविश्वारूपाणिपरितावभूव यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयी
णां आयंगौरितिमंत्रेणराहुंचपरिपूजयेत् आयंगौरितिमंत्रस्यसर्पराज्ञीऋषिः गायत्री ७
छंदः राहुर्देवता राहुस्थापनेवि० आयंगौपृश्निरक्रमीदसदन्मातरंपुरः पितरंचप्रयत्स्वः ५२

ब्रह्मयज्ञानेमंत्रेणकेतुंचपरिपूजयेत् ब्रह्मयज्ञानमितिमंत्रस्यप्रजापतिऋषिःत्रिष्टुप्छंदःकेतु
र्देवताकेतुस्थापनेवि० ब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवःसबुध्न्याउपमाअ
स्यविष्ठाःसतश्चयोनिमसतश्चविवः ५८ सप्तमात्रेति मंत्रेणपूजयेत्सप्तमातरः ब्राह्मीमाहेश्व
रीचैवकौमारीवैष्णवीतथा वाराहीचैवमाहेंद्रीचामुंडासप्तमातरः सप्तमात्र्यदेव्या इति मंत्रस्यवा
मदेवऋषिःपंक्तीछंदःमातरोदेवतामातरस्थापनेवि० सप्तमात्र्यदेव्याधिपासंदक्षिपोरुचस्सता॥
मामश्चापुप्रमोषीमोहिंनवचीरंविद्वेपतवदेधिसंदशो ५९ दुर्गापूजाततोवायव्येवज्रादीन्यायुधानिच
वज्रंशक्तिंचदंडंचखड्गपाशांकुशौतथा गदात्रिशूलंचक्रंचपद्मंचेतिक्रमादृषा दुर्गायेनमः
इतिमध्ये वज्रायनमः शक्तयेनमः दंडायनमः खड्गायनमः पाशायनमः अंकुशायनमः ग
दायैनमः त्रिशूलायनमः चक्रायनमः पद्मायनमः ततोधूपदीपनैवेद्यताम्बूलदक्षिणापूग
फलवार्ताविलसमर्प्यकृतेनतत्तनचजीवयोगागभूतहवनकर्मणायपयासंपादितसोमयज्ञाकृतेनो
नपूजनेनसर्वतोभद्रमंडलस्थापितदेवाःसुप्रीताःवरदाःसंतु आयुःकर्तारःक्षेमकर्तारःशुभ
कर्तारःकल्याणकर्तारोभवंतु इतिसर्वतोभद्रपूजनम् वेदीत्रदक्षिणीकृत्यफलमत्रानिपोजयेत्

अर्द्धपदं रक्तवर्णं ७

२ आवाहयाम्यहं देवीं शुभदां नाम वेदिकां अस्मिन् यज्ञे महामातर्निर्विघ्नं कुरु मे सदा पुत्रान् देहि ध
नं देहि सर्वकामांश्च देहि मे ततो वेद्यां वेदिरिति पठेत् वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियं
यूपेन यूप आप्यते प्रणीतो अग्निरग्निना ॐ अथ वास्तुपूजनविधिः ईशाने गणेशादीन् पू
जयेत् गणानां त्वा १ ततो वेदं पूजयेत् वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदो भवस्तेन मह्यं वेदो
भूयाः देवा गातुविदो गातुं वित्वा गातुमित मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः २ ततः
सरस्वतीं सरस्वती योन्या गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति अपां रसेन वरुणो न सा
म्नेन्द्रं श्रियै जनयन्नप्सु राजा ३ ततोऽईशं पूज्य तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्व
मवसे हूमहे वयम् पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ४ पर्जन्यं पू
ज्य शन्नो वातः पवतां शन्नस्तपतु सूर्यः शन्नः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु ५ ज
यं पूज्य यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा यो देवानां नामधा एक
एव तं संप्रश्नं भुवना यन्त्यन्या ६ महेन्द्रं पूज्य महाँ इन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु
हन्तु पाप्मानं योऽस्मान् द्वेष्टि उपयामगृहीतोऽसि महेन्द्राय त्वा ७ आदित्यं पूज्य आदित्यं ग

द्विपदं पीतवर्णम् २ द्विपदं रक्तवर्णम् १

द्विपदं पीतवर्णम् ३

तार्द्धपदं पीतवर्णम् ८

यतो योनि र्मे
इन्द्रो यत्ला २

यतो योनिर्महेन्द्रो यत्वा १

सप्तं द्विपदं श्वेतवर्णं २ ६८

मेँ पयसा समंधितह स्वस्त्यन्ति मां विश्वरूपम् परिष्टिग्धि हरसामंमिमथं स्योशतायुषंकृ
णुहिधीयमानः ८ सर्वंपूज्य सत्यंचमे श्रद्धाचमे जगच्चमे धनंचमे विश्वंचमे महश्चमेक्री
डाचमे मोदश्चमे जातंचमे जनिष्यमानंचमे सूक्तंचमे सुकृतंचमे यज्ञेन कल्पतां ९ भर्गंपू
ज्य भायैदार्वाहारं प्रभाया अग्न्येधं ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं
देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितारं सर्वेभ्यो लोकेभ्यः उपसेक्तारं अवऋत्यै व
धायोपमन्थितारं मेधाय वासः पल्पूलीं प्रकामाय रजयित्रीम् १० अन्तरिक्षंपूज्य हंसः शु
चिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋत
जा अद्रिजा ऋतं बृहत् ११ अयंदक्षिणभागेपूज्यौः अग्निंपूज्य अग्निं दूतं पुरोदधे हव्य
वाहमुपब्रुवे देवाँ आसादयादिह १२ पूषणंपूज्य पूषन्तव व्रते वयं न रिष्येम कदाचन स्तो
तारस्त इह स्मसि १३ चिन्तयंपूज्य वीतं हविः शमितं शमिताय तुर्य्यो यज्ञो यत्र हव्य
मेति ततो वाका आशिषो नो जुषन्तां १४ गृहाध्यक्षंतंपूज्य गृहा मा बिभीत मा वेपध्वमूर्जं
बिभ्रत एमसि ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः १५ पर्णंपूज्य

तार्ईपदं रक्तवर्णम् ४

तार्ईपदं रक्तवर्णम

अर्द्धपदं कृष्णवर्णं ६

अर्द्धपदं कृष्णवर्णं ५

द्विपदं कृष्णवर्णं १

द्विपदं कृष्णवर्णं द्विपदं श्वेतवर्णं २

ईडुसवाकुरसिदक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरि डईडितः ३

द्विपदं पीतवर्णं २ मंध्या सेईपदं कृष्णवर्णं ४

पमायत्वा मखायत्वा सूर्यस्यत्वा तपसे देवस्त्वा सविता नक्तु पृथिव्याः संस्पृशस्पाहि अर्चिर
सि शोचिरसि तपोसि १६ गंधर्वं पूजय गंधर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै य
जमानस्य परिधिरस्यग्निरिडईडितः मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण विश्व
स्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडईडितः १७ मगराजं पूजय सुपर्णोसि गरुत्मान्
त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथंतरे पक्षौ स्तोम आत्मा छंदांसि अंगानि यजूंषि नाम
अर्द्ध १६ पीतवर्णं साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः सुपर्णोसि गरुत्मान् दिवं गच्छ स्वः
पत मगं पूजय पुरुषमगं स्वदः मसोगोधाकालकादर्वाघाटस्तिवनस्पतीनां कृकवाकुः
प सावित्रो हंसो वातस्य नाक्रो मकरः कुलीपयस्तेकूपारस्य ह्रियै शल्यकः १८ अपूपं पिंडं म
भागे पूजयेत् पितॄन् पूजय पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्व
धानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्न पितरो अमीमदन्त पितरोतीतृ
पन्त पितरः शुंधध्वं २० दौवारिकं पूजय ० द्वे विरूपे चरतः स्वर्थे अन्यान्यावत्समुपधापते ह

अर्द्धपदं श्वेतवर्णं २ सार्द्धपदं श्वेतवर्णं १

गा ५ साईपद्मंकपुर्वर्णम् ६ द्विपद्मंकुसुमवर्णं १ द्विपद्मंश्वेतवर्णं २

रिरस्य सोमभवति स्वधावान् शुक्रो अस्य सोंदृदृशे सुवर्चाः २१ तुंबीवं पूजनं शतवो अस्य वधा
मन्नि सहस्रमुत वो रुहः अधा शतक्रत्वो यूयमिमं मे अगदं कृत २२ पुष्पदंतं पूजनं ओ
षधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः २३ बेद
लां पूजनं इमं मे वरुणस्वधीः हवमद्या च मृडय त्वामवस्युराचके २४ अंकुरं पूजनं ये रूपा
णि प्रतिमुंचमाना असुराः संतः स्वधया चरंति परापुरो निपुरो ये भरंत्यग्निष्टांल्लोकात्
प्रणुदात्यस्मात् २५ अशोकं पूजनं आयाताय स्वाहा प्रायाताय स्वाहा संयाताय स्वाहा वि
याताय स्वाहोद्याताय स्वाहा शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा २६
पापपद्मं पूजनं महाँ इंद्रो वज्रहस्तः षोडशी शर्म यच्छतु हंतु पाप्मानं यो ऽस्मान् द्वेष्टि उ
पयाम गृहीतो ऽसि महेंद्राय त्वैष ते योनिर्महेंद्राय त्वा २७ अपोन्नरे पूजयेत् रोगं पूजयेत्
आपो ऽस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु विश्वं हि रिप्रं प्रवहंति देवी रु
दिदाभ्यः शुचिरापूत एमि दीक्षातपसोस्तनूरसि तां त्वा शिवां शग्मां परिदधे भद्रं वर्णं पुष्यन् २८

द्विपद्मंश्वेतवर्णम् ३ द्विपद्मंकुसुमवर्णम् ४

सर्वपद्मंकुसुमवर्णम् ४

सर्वपद्मंकुसुमवर्णम् ३

६

सार्द्धपदं श्वेतवर्णम् १ द्विपदं श्वेतवर्णं ४ द्विपदं पीतवर्णम् ३ द्विपदं रक्तवर्णं ५
द्विपदं श्वेतवर्णम् २

१० नागं पूज्य॰ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु ये अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः २९ मु
ख्यं पूज्य महीमू षु मातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम तुविक्षत्रामजरन्तीमुरूचिꣳ
ꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ३० भल्लाटं पूज्य आपापस्व समेतु ते विश्वतः सोम
ष्ण्यं भवा वाजस्य संगथे ३१ सोमं पूज्य॰ सोमो धेनुꣳ सोमो अर्वन्तमाशुꣳ सोमो वीरं कर्म
ण्यं ददाति सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ३२ उरगं पूज्य याइषवो
यातुधानानां ये वा वनस्पतीꣳरनु ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ३३ अदितिं पूज्य
अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः विश्वेदेवा अदितिः पंचजना अदि
तिर्जातमदितिर्जनित्वं ३४ दितिं पूज्य यद्दिवा यद्दिनक्तमेनाꣳसि चकृमा वयम् वायुर्मा त
स्मादेनसो विश्वान्मुञ्चत्वꣳहसः ३५ मध्ये ब्रह्माणं पूज्य॰ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसी
मतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ३६ पूर्वे
अर्यमणं पूज्य अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय वाचं विष्णुꣳ सरस्वतीꣳ सवि १०

सार्द्धपदं कृष्णवर्णम् ८
द्विपदं पीतवर्णम् ६

द्विपदं श्वेतवर्णं १ चतुष्पदं रक्तवर्णम् ३

द्विपदं रक्तवर्णं १ एकपदं श्वेतवर्णं ५ द्विपदं श्वेतवर्णम् २

तारंचवाजिनथं स्वाहा ३७ दक्षिणे वैश्वदेवं पूज्य वैश्वदेवी पुनती देव्यागाद्यस्यामिमा वह्व्यस्तन्वो
वीतपृष्ठाः तया मदन्तः सधमादेषु वयथं स्याम पतयो रयीणाम् ३८ पश्चिमे मैत्रं पूज्य॰ मित्रस्य च
र्षणीधृतो वो देवस्य सानसि द्युम्नं चित्रश्रवस्तमम् ३९ उत्तरे पृथिवीधरं पूज्य॰ पृथिव्याः
पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रवि
णायजस्वाश्विनाध्वर्यू सादयतामिह त्वा ४० ईशाने आपोदैवतं पूज्य॰ आपो हि ष्ठा मयो भुवः
स्तान ऊर्जे दधातन महे रणाय चक्षसे ४१ नन्दैवत उपवेशं पूज्य॰ द्रुपदादिव मुमुचानः स्वि
न्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ४२ अग्न्यां सवितारं पूज्य॰ सवि
ता प्रथमेहन्नग्निर्द्वितीये वायुस्तृतीये आदित्यश्चतुर्थे चन्द्रमाः पंचमे ऋतुः षष्ठे मरुतः सप्तमे बृ
हस्पतिरष्टमे मित्रो नवमे वरुणो दशमे इन्द्र एकादशे विश्वे देवा द्वादशे॰ ४३ नन्दैवसावित्रीं
पूज्य उपयामगृहीतोसि सावित्रोसि चनोधाश्चनोधा असि चनो मयि धेहि जिन्व यज्ञं
जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे ४४ नै[illegible]र्भीतपेयं पूज्य॰ यां आवह उशतो देवदेवां
स्तान् प्रेरयत्से अग्ने सधस्थे पक्षिवाथंसः पपिवाथं स विश्वे असुं घर्मथं स्वराग्निष्टतान्
स्वाहा ४५

एकपदं रक्तवर्णं ८

द्विपदं रक्तवर्णम् ३

अर्द्धपदं ... ६ ... धूम्रवर्णं

एकपदं श्वेतवर्णम् २

गुधाधिपः

११ नैऋत्ये वरुणपदं तं पूज्य अग्ने वाचं वाक्त्वं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये वागो
जः सहौजो मयि प्राणापानौ ४६ वायव्ये रुद्रं पूज्य नमः शम्भवाय च मयोभवाय च नमः
शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ४७ नैऋत्ये वरुणदासं पूज्य· नमस्ते
रुद्र मन्यव उतो त इषवे नमः बाहुभ्यामुत ते नमः ४८ ईशाने चरकादेवीं पूज्य· रुद्राः स
ꣳसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते ४९
अग्नेय्यां विदारिकां पूज्य· अक्षै राजा प्रकितवं कृतायादिनव दर्शं त्रेतायै कल्पिनं
द्वापराय धिकल्पिनं आस्कंदाय सभास्थाणुं मृत्यवे गोव्यछं अंतकाय गोघातं क्षुधे यो गां
विकृंतंतं भिक्षमाण उपतिष्ठति दुःकृताय चरकाचार्यं पाप्मने सैलगं ५० नैऋत्ये पू
तनां पूज्य· विदद्यदीसरमा रुग्णमद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः अग्रं नयत्सुपद्य
क्षराणामच्छा रवं प्रथमा जानती गात् ५१ वायव्ये पापराक्षसीं पूज्य· पुरोदिताओ
विष्णुरुपदुरं तं महिमानमानंजधीरः एकपदी द्विपदी त्रिपदी चतुष्पदी अष्टापदी भु
वनानु प्रथन्तां स्वाहा ५२ पूर्वे स्कंदं पूज्य· स्कंदनमघं देवेभ्यः आपयन्तमि ११
स

पातमंत्रिणाविसोमापत्वोकमिषंवसुमतीमतिमग्ने तच्छ्वापातुप्रस्थेवंविस्रोस्यानमसी
तइंशेवीपृंकृणेद्दृर्ध्वद्भवोस्त्रास्यात् ५३ दक्षिणेअर्पमणंपूजयेत्· अर्पमणंवृहस्पतिमिं
दूंदानापयोदृप वार्यंविस्तुथंसरस्वतीसुंसवितारंवातनथंस्वाहा ५४ पश्चिमेजंभकं
पूजयेत्· आपश्चिमिपुत्तिर्मानगावोनसासन्धांजरतातमइंद्रमू पाहिवापुर्न्नेनिपुतोअग्न
येथंहिधिमिदृपसेविवाजान् ५५ उत्तरेपिलिपिच्छिकांपूजयेत् अग्नरणीरसल्लावेशाप
न्नेनसणामेतसविनादधिलास्यास्पतिदेवस्त्वासविताद्वानक्रुसुपिप्पलाभ्युस्त्वोषधीभ्यःघा
मन्तुणास्वक्षाअंतरिक्षेमध्येनाप्राःपृथिवीमुपरेणादंथंहाः ५६ पूर्वेहेतुकंपूजयेत्·
हेमंतेनऋतुनादेवाश्विनावमरुतस्तुतः वलेनर्तंकारीःसहोहविरिंद्रेवयोदधुः ५७ आग्ने
य्यांत्रिपुरांतकंपूजयेत्· अंबकंपजामहेसुगंधिंपुष्टिवर्द्धनं उर्वारुकमिवबंधनान्मृत्योर्मुक्षी
यमामृतात् ५८ दक्षिणेअग्निवेतालंपूजयेत्· अग्निश्चमेवर्मश्चमेऽर्कश्चमेसूर्यश्चमे
प्राणश्चमेऽश्वमेधश्चमेपृथिवीचमेदितिश्चमेघोश्चमेऽंगुलयश्चमेशक्करयोदिश
श्चमेयज्ञेनकल्पंतां ५८ नैर्ऋत्येअग्निजिव्हांपूजयेत्· अग्निर्ल्लिंगमेनशोचिषाया

१२ सद्धिश्वस्यत्रिणाम् अग्निर्नोवनितरयिं ६० पश्चिमेकालंपूज्य. कार्षिरसिसमुद्रस्यत्वाक्षित्याउन्नया
मि समापोऽद्भिरग्मत समोषधीभिरोषधीः ६१ वायव्येकरालिनंपूज्य. कयानश्चित्रआभुवदूती
सदावृधः सखा कयाशचिष्ठयावृता ६२ उत्तरे एकपादंपूज्य. विश्वतश्चक्षुरुतविश्वतोमुखोवि
श्वतोबाहुरुतविश्वतस्पात् संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः ६३ ईशाने ई४
भीमरूपकंपूज्य. मापेहावोहारंम्रभंपाःअग्नेधूंम्र धूमस्यविषपापाभिषेक्तारं वार्षिष्ठापना
कायपरिवेष्टारे देवलोकायपेशितारंमनुष्यलोकायप्रकाशितारंसर्वेभ्यः लोकेभ्यउपले
क्तारं अवऋत्यैवधायोपमंथितारं मेधायवासः पल्पूलीं प्रक्रमयरजयित्रीम् ६४ पाताले ज्वा
मुखंपूज्य. ॐ जानःप्रथमंमनसस्त्वापसविताधिपुः अग्नेज्योर्निधायपृथिव्या अध्या
भरत् ६५ आकाशेगंधर्वमर्द्दनंपूज्य. गंधर्वस्त्वाविश्वावसुःपरिदधातुविश्वस्यारिष्ट्यै
यजमानस्यपरिधिरस्यग्निरिडईडितः इंद्रस्यबाहुरसिदक्षिणोविश्वस्यारिष्ट्यैयजमा १२
नस्यपरिधिरस्यग्निरिडईडितः मित्रावरुणौत्वोत्तरतःपरिधत्तांध्रुवेणधर्मणाविश्वस्या

रिक्षेपजमानस्यपयिरस्याग्निरिड ईडितः ६६ ननः क्षेत्रपालं पूज्य· क्षेत्रस्य पोनिरसि क्षत्र
स्य नाभिरसि· मात्वाहिंसीन्मामा हिंसीः ६७ ननो वास्तुपुरुषाय नमः इति वास्तुमंडलं च
तुर्दिक्षु पूजयेत् ननो धूपदीपनैवेद्यानां वूलं चर्म्मानदक्षिणावासस्तारीलसमर्प्य कृतस्य शतचं
डीप्रयोगस्येतदंगभूतहवनकर्म्मांगत्वेन यथासंपादित समग्रया कृतेनानेन पूजनेन वास्तु
मंडलस्थापित देवाः सुप्रीताः वरदाः संतु इति वास्तुपूजनविधिः कृतस्य शतचंडीप्रयोग
स्यतदंगभूतहवनकर्म्मांगभूत यथासंपादितसामग्र्या चतुःषष्ठियोगिनीनां पूजन
महं करिष्ये ननयथा गं गजाननायै नमः गं गजाननां आवाहयामि स्थापयामि पूजयामि
नमः १ एवं सर्वत्र ज्ञेयमिति १ सिं सिंहमुख्यै नमः २ गं गृध्रास्यायै नमः ३ मां माहेश्वर्यै
नमः ४ उं उष्ट्रग्रीवायै नमः ५ हं हयग्रीवायै नमः ६ कों कालराज्यै नमः ७ निं निशाचर्यै
नमः ८ कं कंकाल्यै नमः ९ रौं रौद्रविकायै नमः १० फें फेत्कार्यै नमः ११ भूं भूतगेयै नमः १२ वं
वाराह्यै नमः १३ सं सरभास्यायै नमः १४ प्रें प्रेतान्यै नमः १५ मां मांसभोजनायै नमः १६ डाकि

ल

१३ मैनमः १७ काल्यैनमः १८ शुल्कायैनमः १९ कंहप्रियायैनमः २० उलूकिकायैनमः
२१ शिवरावायैनमः २२ धूम्राक्ष्यैनमः २३ चिंचनादिन्यैनमः २४ ऊर्ध्वकेश्यैनमः २५ भ
द्रकेश्यैनमः २६ शवहस्तायैनमः २७ मालिन्यैनमः २८ कपालहस्तायैनमः २९ र
क्ताक्ष्यैनमः ३० श्येनायैनमः ३१ रुधिरपायिन्यैनमः ३२ खड्गिन्यैनमः ३३ दीर्घलं
बोष्ठ्यैनमः ३४ पाशहस्तायैनमः ३५ बलाकिन्यैनमः ३६ काकतुंडायैनमः ३७ पु
नः पाशहस्तायैनमः ३८ धूर्जटायैनमः ३९ विषभक्षिण्यैनमः ४० त्रिशुद्ध्यैनमः
४१ पापहंत्र्यैनमः ४२ मधूर्ध्व्यैनमः ४३ विकटाननायैनमः ४४ भयध्वंसिन्यैनमः
४५ प्रेताशायैनमः ४६ प्रेतवाहिन्यैनमः ४७ कोटराक्ष्यैनम ४८ लम्बजिव्हायैनमः ४९
भ्रष्टचक्रायैनमः ५० दुरत्रिपायैनमः ५१ व्यालास्यायैनमः ५२ धूमनिश्वासायै
नमः ५३ त्रिपुरायैनमः ५४ भुवनेश्वर्यैनमः ५५ वक्रतुंड्यैनमः ५६ दंडहस्ता १३

१४ यैनमः ५७ प्रचंडायैनमः ५८ चंडविक्रमायैनमः ५९ स्थूलकश्यैनमः ६० वृहत्कुं
क्ष्यैनमः ६१ यमदूत्यैनमः ६२ करालिन्यैनमः ६३ कुब्जिकायैनमः ॥ कुब्जिकां आ
वाहयामि स्थापयामि पूजयामि नमः एवं सर्वत्र स्थाने कृत्वा धूपदीपनैवेद्यता
म्बूलादीन् समर्प्य कृतेनानेन पूजनेन चतुःषष्ठियोगिन्यः प्रीता वरदाः भवंतु इ
ति चतुःषष्ठियोगिनीनां पूजा समाप्ता शुभमस्तु संवत् १९४२ म्वलेषि विश्वेश्वर
गंगा ठकुरेण आत्मपठनार्थं ॥

इति चतुःषष्टि योगिनी पूजा